अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS 105**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा - दिसम्बरमासः - 2017**

**एम.ए. संस्कृतम्, (सत्रम् : प्रथमम्)**
**संस्कृतवाङ्मयस्य इतिहासः**

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्ड-क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः** 'क' खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. वैदिकसंहितामधिकृत्य एकः परिचयात्मको निबन्धो लेखनीयः।
2. महाभारतकालिकसमाजस्य चित्रणं विधीयताम्।
3. रामायणकाले नारीणां स्थितिः कीदृशी आसीत्? 'इत्यस्मिन् विषये एको निबन्धो लिख्यताम्।
4. उपनिषद्-वाङ्मयमवलम्ब्य परिचयात्मक एको निबन्धो लेख्यः।
5. न्यायदर्शनस्य परिचयो वैशिष्ट्यं च प्रस्तूयेताम्।

## खण्ड-ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः** 'ख' खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. पुराणपरिभाषा प्रस्तोतव्या।
2. वैशेषिकदर्शनस्य परिचयः प्रदेयः।
3. यथाधीतग्रन्थं महाभारतस्य रचनाकालः प्रदर्शनीयः।
4. आरण्यकग्रन्थानां परिचयः समासेन प्रदेयः।
5. पूर्वमीमांसादर्शनस्य परिचयः प्रस्तूयताम्।
6. रामायणस्योपरि परिचयात्मिका टिप्पणी कार्या।

## खण्ड-ग

## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग' खण्डे दशलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । (10×0.5=05)**

1. ईशोपनिषत् शुक्लयजुर्वेदस्य कस्मिन् अध्याये सम्बद्धा वर्तते?
   (अ) प्रथमाध्याये (ब) विंशाध्याये
   (स) त्रिंशाध्याये (द) चत्वारिंशत्तमाध्याये
2. ऋग्वेदस्य कति शाखाः सन्ति?
   (अ) नव (ब) एकविंशतिः
   (स) सहस्रम् (द) एकशतम्
3. वेदत्रयी इत्युक्तौ कस्य वेदस्य ग्रहणं न भवति?
   (अ) ऋग्वेदस्य (ब) यजुर्वेदस्य
   (स) सामवेदस्य (द) अथर्ववेदस्य
4. रामायणे कति काण्डाः सन्ति?
   (अ) षट् (ब) सप्त
   (स) अष्ट (द) नव
5. कति पुराणानि सन्ति?
   (अ) दश (ब) अष्टादश
   (स) एकविंशतिः (द) शतम्
6. 'जय' इति नाम कस्य ग्रन्थस्य वर्तते ?
   (अ) महाभारतस्य (ब) रामायणस्य
   (स) वेदस्य (द) मीमांसासूत्रस्य
7. छान्दोग्योपनिषत् केन वेदेन सम्बद्धा वर्तते ?
   (अ) ऋग्वेदेन (ब) यजुर्वेदेन
   (स) सामवेदेन (द) अथर्ववेदेन
8. गोपथब्राह्मणं कस्य वेदस्य वर्तते?
   (अ) ऋग्वेदस्य (ब) यजुर्वेदस्य
   (स) सामवेदस्य (द) अथर्ववेदस्य
9. शाकलशाखा कस्य वेदस्य वर्तते?
   (अ) ऋग्वेदस्य (ब) यजुर्वेदस्य
   (स) सामवेदस्य (द) अथर्ववेदस्य
10. महर्षिजैमिनिः कस्य दर्शनस्य प्रवर्तको मन्यते ?
   (अ) न्यायदर्शनस्य (ब) वैशेषिकदर्शनस्य
   (स) सांख्यदर्शनस्य (द) मीमांसादर्शनस्य

---------------x---------------